

# सम्प्रेषिका

## वार्षिकपत्रम्

२०२४-२०२५

अतीव आनन्दस्य विषयः अस्ति यत् 'सम्प्रेषिका'* इति नाम्ना स्थापितं समाचारपत्रं 'लेडी श्रीराममहिलामहाविद्यालयस्य' संस्कृतविभागेन प्रकाश्यते। गतवर्षे संस्कृतविभागेन अनेकाः शैक्षणिक-सांस्कृतिककार्यक्रमाः आयोजिताः आसन्। येषां विवरणं समाचारपत्रेऽस्मिन् प्रस्तूयते । सर्वप्रथमम् आवां महाविद्यालयस्य समादरणीयायै प्राचार्यावर्यायै प्रो.कनिकाआहूजामहोदयायै हार्दिकधन्यवादान् आभारञ्च ज्ञापयावः यासाम् सहयोगेन सकारात्मक-चिन्तनेन च इदम् समाचारपत्रम् आकारं गृहीतवत् । संस्कृतविभागस्य छात्राणां निरन्तरप्रयत्नाः अपि अतीव प्रशंसनीयाः श्लाघ्नीयाः च सन्ति। एतदर्थं ताभ्यः सर्वाभ्यः छात्राभ्यः स्वकीयाः अनन्ताः शुभकामनाः प्रसारयावः। आवाम् अस्माकं विभागस्य सर्वेभ्यः संकायसदस्येभ्यः अपि हृदयेन धन्यवादं प्रकटयावः।

**भवदीयौ (प्रभारिणौ-सम्प्रेषिका)**
डॉ. वन्दना रानी
सूर्यदेवः बहुगुणा





## सम्पादिकायाः विचारः

वयं नूतनं शैक्षणिकवर्षं प्रारभामः । अत्र २०२४-२०२५ तमवर्षस्य संस्कृतविभागस्य सम्प्रेषिका इत्यस्य वार्षिकपत्रस्य सर्वेषां पाठकानां हार्दिकं स्वागतं करोमि। अयं मञ्चः अस्माकं विभागस्य जीवन्तभावानां, शैक्षणिकसाधनानां, रचनात्मकप्रयत्नानां च प्रदर्शनं करोति ।

कार्ये अस्मिन् योगदातृणां, साहाय्यकर्तॄनां, दलस्य सदस्यानां च समर्पणार्थं धन्यवादं वदामि। भवतां प्रयत्नाः सम्प्रेषिकाम् जीवन्तां कुर्वन्ति, अस्माकं विभागस्य उत्कृष्टतां प्रतिबिम्बयन्ति च।

अस्य वृत्तपत्रस्य उद्देश्यमस्ति यत् समुदायभावः वर्धेत् । विभागस्य वार्तानां घटनानां आयोजनानां च सूचना सर्वेषां पार्श्वे स्यात् । आशां करोमि यत् भवन्तः पत्रमिदं सूचनाप्रदं आकर्षकं च प्राप्नुयुः।

धन्यवादः

**सरिता भट्ट**



**संस्कृतछात्रसङ्घस्य स्नेहवाचः**

अत्यन्तहर्षस्य विषयः अयं यत् संस्कृतविभागः पुनः "सम्प्रेषिका " इति वार्षिकपत्रिकां प्रकाशयति। वयमपि संस्कृतविभागस्य अतिश्लाघनीयप्रयासाय हार्दिकशुभकामनाः प्रेषयामः। सस्नेहम् अभिनन्दनानि।

मोनिका (अध्यक्षा), भूमिका कपाले(सचिवा) ,आशी सावरिया (कोषाध्यक्षा)









# संस्कृतसप्ताहः

संस्कृतसप्ताहः प्रतिवर्षं विश्वस्य संस्कृतदिनस्य परितः आचर्यते यत् श्रावन्मासस्य पूर्णिमायाः अस्ति। अस्याः उद्देश्यमस्ति छात्रान् संस्कृतभाषायां रुचिः विकसिता भवेत् प्राचीनभारतीयासंस्कृतेः ज्ञानं प्रति च प्रोत्साहनं वर्धेत् । अस्मिन् सप्ताहे विद्यालयेषु महाविद्यालयेषु च बहवः कार्यक्रमः स्पर्धाः च आयोज्यन्ते। अस्मिन् सप्ताहे अस्माकं लेडीश्रीराममहिलामहाविद्यालये महाभारतस्य विषये एकः प्रश्नोत्तरीप्रतियोगिता आयोजिता आसीत्। कार्यक्रमः अयं अस्माकं महाविद्यालयस्य सर्वेषां विभागानां छात्राणां कृते उद्घाटितः आसीत्। अस्मिन् प्रश्नोत्तरे अस्माकं प्राचीनभारतीयमहाकाव्यानां विषये छात्राणां ज्ञानं यथा रामायणस्य, महाभारतस्य च इत्यादीनां विषयाणां परीक्षणं कृतम्, छात्राः लघुपुरस्कारैः पुरस्कृताः कृताः। संस्कृतसाहित्ये रुचिं प्रवर्तयितुं भारतस्य समृद्धसांस्कृतिकविरासतां अन्वेष्टुं च छात्रान् प्रोत्साहयितुं च एतत् निर्मितम् आसीत् । आयोजनं एकं सुध्वनिंपूर्णं सफलम् आसीत् यतः प्रतिभागिनः अस्मिन् प्रश्नोत्तरे अतीव उत्साहेन भागं गृहीतवन्तः।





## विश्वसंस्कृतदिवसः

२० अगस्त् २०२४ तमे दिनाङ्के लेडीश्रीराममहिलामहाविद्यालये संस्कृतविभागेन विश्वसंस्कृतसप्ताहस्य अवसरं स्मृत्वा **"पाण्डुलिपेः सञ्चारमाध्यमपर्यन्तम् - पत्रकारितायां संस्कृतभाषायाः नवीनं योगदानम्"** इत्यस्मिन् विषयसन्दर्भे एकः भाषणसत्रः आयोजितः। एषः कार्यक्रमः गूगल-मिट्माध्यमेन सायं ४.३० वादनतः ५.३० वादनपर्यन्तं सञ्चालितः। कार्यक्रमस्य आरम्भः मंगलाचरणेन अभवत्। अनन्तरं कार्यक्रमस्य च वक्तृणां च परिचयः प्रदत्तः। प्रमुखवक्तारौ आस्ताम् -**डॉ. बलदेवानन्दसागरः**, भारतीयसंस्कृतपत्रकारसंघस्य महासचिवः **निधिझा** च। सुश्री निधिः आकाशवाण्यां संस्कृतवार्तावाचिका अस्ति।डॉ.बलदेवानन्दसागरः पत्रकारितायां संस्कृतभाषायाः भूमिकां विस्तरेण समालोच्य संस्कृतपत्रकारितायाः इतिहासं "काशीविद्यासुधानिधिः (१८६६)" इत्यस्मिन् ग्रन्थस्य आधारे निरूपितवान्। निधिझा महोदया अपि आधुनिकमाध्यमेषु संस्कृतभाषायाः उपयोगस्य अपूर्वदृष्टिं प्रकाशितवती । एतेन वक्तृद्वयेन पत्रकारिताविषये अतिशयं हितकारिणी सूचना प्रदत्ता या हि अस्माकम जीवने उपयोगिनी भविता नूनम् । अनन्तरं छात्रैः अत्याकर्षकाणि प्रश्नानि पृष्टानि । अन्ते शिक्षकप्रभारिणी पंकजाघईकौशिकमहोदया वक्तृद्व्यं प्रति धन्यवादं कृत्वा कार्यक्रमस्य समापनं कृतवती।






# फ्रेशर्स – पार्टी











## संस्कृतगद्यवाचनस्पर्धा

सितम्बर् २०२४ षड्विंशतिः तमे दिनाङ्के संस्कृतविभागेन गद्यवाचनस्पर्धा आयोजिता आसीत्। अस्याः स्पर्धायाः आरम्भः मंगलाचरणेन सह अभवत्। अस्याम् स्पर्धायां सर्वे प्रतिभागिनः द्वौ गद्यपाठौ लब्धवन्तः, यतः कस्यचित् एकस्य शुद्धतया उच्चारणं कर्तव्यम् आसीत्। सर्वेभ्यः विद्यार्थिभ्यः पञ्चात् सप्त पर्यन्तं मिनिटपरिमितः समयः प्रदत्तः आसीत्। अस्याः प्रतियोगितायाः नियमः आसीत् यत् गद्यस्य शुद्धरूपेण उच्चारणं करणीयम्।अस्यां प्रतियोगितायां विजेतारः इमाः आसन्–

प्रथमं पुरस्कारम् - सरिता भट्टः (द्वितीयवर्षे)

द्वितीयं पुरस्कारम् - स्मृतिः वर्मा (द्वितीयवर्षे), यतिशर्मा (तृतीयवर्षे)

तृतीयं पुरस्कारम् - प्रख्या शर्मा (प्रथमवर्षे), मोनिका झा (तृतीयवर्षे)

सांत्वनापुरस्कारः - नन्दिनी विज (द्वितीयवर्षे),अमिता श्रीवास्तवः (प्रथमवर्षे)

अस्यां प्रतियोगितायां सर्वाः छात्राः उत्साहेन भागं स्वीकृतवत्यः। अन्ते शान्तिपाठेन धन्यवादवाक्येन च प्रतियोगिता समाप्ता।







# अन्तर्विभागीया**श्लोकगायनप्रतियोगिता**

लेडीश्रीराममहाविद्यालये इत्यस्य संस्कृतविभागेन आयोजिता

तिथिः – १७ अक्टोबर् २०२४

अस्माकं लेडीश्रीराममहाविद्यालये संस्कृतविभागेन १७ अक्टोबर् २०२४ तमे दिने अन्तर्विभागीयाश्लोकपाठप्रतियोगिता आयोजिता। छात्राः श्रीवल्लभाचार्यविरचितस्य मधुराष्टकस्य प्रथमान् पञ्चश्लोकान् सम्यक् स्मृत्वा विना पाठ्यमालोक्य पठितवत्यः। पाठिकानां उच्चारणम्, गायनशैलीं स्मृतिशक्तिं च आधारं कृत्वा मूल्यांकनं कृतम् ।कार्यक्रमः मङ्गलाचरणेन आरब्धः। निर्णायकमण्डले आसीत् डा.वन्दनाभान्महोदया श्रीसूर्यदेवः च। डा. वन्दना रानी अपि विभागस्य समर्थनाय उपस्थितवती।विभागस्य छात्राः उत्साहेन सह प्रतियोगितायां भागं गृहीत्वा उत्तमं प्रस्तुतीकरणं कृतवत्यः।निर्णायकसमित्या: निर्णयानुसारं, निम्नलिखिताः छात्राः पुरस्कारं प्राप्तवत्यः—

प्रथमं स्थानम् – यतिशर्मा (तृतीयवर्ष)

द्वितीयं स्थानम् – अमिता श्रीवास्तवः(प्रथमवर्ष)

तृतीयं स्थानम् – सुधा सूर्य(प्रथमवर्ष)

सान्त्वनापुरस्कारं प्राप्तवत्यौ – सुप्रिया सिन्हा च लक्षाकी गुप्ता च(द्वितीयवर्ष)

कार्यक्रमः डा. वन्दना भान् महोदयायाः समापनभाषणेन समापितः। पश्चात् शान्तिपाठः अपि कृतः, येन दिवसस्य समापनं शान्तिपूर्वकं जातम्।





# चित्रकलाप्रतियोगिता

लेडीश्रीराममहाविद्यालयस्य संस्कृतविभागे फरवरीमासस्य विंशतिःदिनाङ्के 2025 चित्रकलाप्रतियोगिता आयोजिता। कार्यक्रमस्य आरम्भः मंगलाचरणेन कृतः। छात्राः बहुसंख्यायां भागं गृहीत्वा स्वकौशलं प्रदर्शितवत्यः। प्रतियोगितायाः केचन नियमाः आसन् यथा :- द्वौ श्लोकौ दत्तौ, कस्यचित् एकस्य श्लोकस्य अर्थं अवगत्य चित्रं निर्मातव्यम् आसीत् | कागदादिकानि कानिचन वस्तूनि विभागेन एव प्रदत्तानि आसन्। अस्य कार्यक्रमस्य सफले आयोजने डॉ.पंकजाघईकौशिकमहोदयायाः (विभागाध्यक्षा), सूर्यदेवःबहुगुणामहोदयस्य (संघप्रभारी) डा.वन्दनारानीमहोदयायाः छात्रपरिषदः सचिवायाः भूमिकायाः कोषाध्यक्षयाः आशेः च एषां अविस्मरणीयं योगदानम् अस्ति।प्रतियोगितायाः केचन नियमाः अपि आसन्, यथा – श्लोकस्य अर्थं सम्यक् ज्ञात्वा चित्रनिर्माणे शुद्धता प्रतिभागिनः चित्रकलाकौशलम्, इत्यादयः।

अन्ते निर्णायकमण्डलेन विजेतॄणां नामानि घोषितानि।

प्रथमं स्थानम् – आश्मा (द्वितीयवर्ष)

द्वितीयं स्थानम् – योगिता (प्रथमवर्ष)

तृतीयं स्थानम् – भूमिका (द्वितीयवर्ष)

सान्त्वना पुरस्कारद्वयं प्राप्तम् –आर्यासिंहः (तृतीयवर्षः) , प्रख्याशर्मा (प्रथमवर्ष) च।

कार्यक्रमस्य अन्ते निर्णायकमण्डलेन सर्वेभ्यः प्रतिभागिभ्यः शुभकामनाः आशीर्वादाः च प्रदत्ताः।







## भाषणस्पर्धायाः विस्तृतवृत्तान्तः

लेडीश्रीराममहाविद्यालयस्य संस्कृतविभागेन २७ फरवरी २०२५ तमे दिनाङ्के एका अतिसंवेदनशीला भाषणस्पर्धा आयोजिताभूत्। अस्मिन् स्पर्धायाम् आराध्यविषयौ आस्ताम् –

१. "भारतस्य राष्ट्रीय-शिक्षानीतेः संस्कृतस्य भूमिका"

२. "संस्कृतनाटकेषु वर्णिताः मनोरञ्जनस्य विविधाः कलाः"

प्रत्येकं भाषणम् ५ निमिषपर्यन्तं दीर्घकालीनम् आसीत्। छात्राः स्वकीयेषु वक्तृत्व-कौशलेषु अतिविद्यमानाः सन्तः, उत्कटभावेन च स्ववक्तव्यम् प्रस्तुतवत्यः। तासां उत्साहः दृष्टः यतः प्रत्येका छात्रा स्वमतेन प्रतिभां प्रदर्शयन्ती, संस्कृतभाषायाः समृद्धिम् अदर्शयत्।

स्पर्धायाः आयोजनस्य मुख्यलक्ष्यं छात्राणां स्वाभाविकीं अभिव्यक्तिं प्रेरयितुं, वक्तृत्व-कौशलस्य विकासं च आसीत्। उपस्थितजनाः स्पर्धायाः उद्देश्यं स्पष्टरुपेण अनुभूतवन्तः। तेषाम् अनुभवः आसीत् यत् भाषणानि केवलं वक्तृत्व-कौशलस्य प्रदर्शनम् न, अपि तु संस्कृतभाषायाः विज्ञापनम्, चैतन्यम् च अभिव्यन्जन्ति।

स्पर्धायाः सम्मानविवरणानि –

प्रथमस्थानम्: सरिता भट्टः (द्वितीय वर्ष)

द्वितीयस्थानम्: स्मृतिः वर्मा (द्वितीय वर्ष)

तृतीयस्थानम्: नन्दिनी विज(द्वितीय वर्ष)

प्रोत्साहनपुरस्कारः: आर्या सिंह (तृतीयवर्ष)

एवं स्पर्धायाः प्रत्येकं वक्तव्यं दर्शकाणां हृदयेषु दीपप्रज्वलनस्य समानम् आसीत्, यतः छात्राणां उदीपनम्, आत्मविश्वासस्य च प्रकाशः अवलोकितः आसीत् । कार्यक्रमस्य अन्वयेन छात्राः न केवलं स्वकार्येषु उत्कटाः अभवन्, अपि तु संस्कृतभाषायाः सौन्दर्यं, वैदुष्यम् च अनुभवन्त्यः, अधीतान् संविद् उत्साहेन समुपस्थिताः अभवन्।

एतादृशानां स्पर्धानामायोजनं न केवलं एकः स्पर्धात्मको विषयः आसीत्, किन्तु संस्कृतभाषायाः प्रचारस्य, छात्राणां व्यक्तित्व-विकासस्य च अद्भुतः माध्यमः अभवत्। उपस्थिताः जनाः तेषां भाषणानां माध्यमेन नवचैतन्यम् अनुभूतवन्तः, यतः संस्कृतभाषा पुनरपि जीवंतानां प्रेरणास्त्रोतः इति दृश्यते।

अयं कार्यक्रमः संस्कृतविभागस्य दीर्घकालीनपरिश्रमस्य, विद्यार्थिनां उत्साहस्य, तथा संस्कृतपारंपर्यस्य पुनर्निर्माणस्य प्रतीकवत् अभवत्। भवतः संस्कृतसंस्कारस्य उज्जवलदर्शिनः प्रयासाः अस्यायां स्पर्धायाम् दृष्टपथाः अभवन् ।

---







## संस्कृति '25 :- प्रथमः दिवसः

संस्कृतेः '२५ समारोहस्य प्रथमदिवसः दीपप्रज्वलनेन शुभारम्भं प्राप्तवान्। ततः मङ्गलाचरणं सरस्वतीवन्दनं च कृतम्, येन दिव्याशिषः आमन्त्रिताः।अयं कार्यक्रमः मान्यैः विद्वद्भिः सन्दर्शितः आसीत्। तेषु प्रो. कांता भाटिया डॉ. ममता त्रिपाठी च विशेषतः आसन्। ते संस्कृतशास्त्रपरम्परायाः दृष्ट्या भारतविकासे स्त्रीणां भूमिं विषये भाषणं कृतवत्यः। तयोः चर्चासु दृष्टं यत् संस्कृतग्रन्थेषु स्त्रीणां समाजनिर्माणे योगदानं स्वीकृतं च उत्सवाय योग्यं च मन्यते।विशिष्टातिथिरूपेण प्रो. अञ्जु सेठ अपि सम्मिलिता आसीत्, या चर्चायाः गम्भीरतां संवर्धयामास।एषा सत्रं बौद्धिकतया समृद्धमासीत्, यत् प्राचीनज्ञानस्य आधुनिके काले प्रासङ्गिकतां प्रदर्शितवती।

कार्यक्रमः धन्यवादसन्देशेन समापनं प्राप्तवान्, यत्र अतिथिभ्यः, आचार्येभ्यः आयोजकसमित्यै च कृतज्ञता प्रकटिता। ततः राष्ट्रगीतेन दिनस्य गौरवपूर्णः एकतायुक्तः च समापनः अभवत्।

संस्कृतेः '२५ उत्साहेन आरब्धम्, येन आगामिदिनानां कृते दृढं अधिष्ठानं स्थाप्यते स्म।









# संस्कृतिः- द्वितीयदिवसः

लेडीश्रीराममहाविद्यालयस्य संस्कृतविभागेन "संस्कृतिः – वार्षिकोत्सवः 2025" इत्यस्य सन्दर्भे एकः भव्यः द्विदिवसीयः कार्यक्रमः आयोजितः। अस्य उत्सवस्य द्वितीयदिवसे विविधाः रोचकाः ज्ञानवर्धकाः च प्रतियोगिताः सम्पन्नाः, यथाः श्लोक-गायनप्रतिस्पर्धा , प्रश्नोत्तरीप्रतिस्पर्धा भाषणप्रतिस्पर्धा च। एतासु प्रतियोगितासु दिल्लीविश्वविद्यालयस्य विभिन्नमहाविद्यालयेभ्यः छात्राः उत्साहपूर्वकं भागं कृतवन्तः। कार्यक्रमस्य शुभारम्भः दीप्प्रवजलेन अभवत् । मंगलाचरेण सरस्वतीवन्दनया च वातावरणं भक्तिमयं जातम्। अध्यक्षीयभाषणेन कार्यक्रमस्य आरंभः अभवत्। मुख्य अतिथिरूपेण आमंत्रितौ डॉ.योगेशशर्मा(पीजी डीएवी दिल्ली विश्वविद्यालय)

डॉ.श्वेतांकभारद्वाजः (श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय) भागरूपेण उपस्थितौ आस्ताम्। श्लोकगायनप्रतियोगितायां छात्राणां उच्चस्तरीयं संस्कृतपाठनकौशलं दृष्टव्यम् आसीत्। ततः भाषणप्रतियोगिता प्रश्नोत्तरी च आह्लादजनके ज्ञानवर्धके प्रतिस्पर्धे आस्ताम् । सांस्कृतिककार्यक्रमेषु पंजाबहिमाचलहरियाणाइत्यादीनां नृत्यप्रस्तुतयः अपि आसन्। याः दर्शकाणां कृते कृताः। सर्वासां प्रतियोगितानां विजेतृभ्यः पुरस्काराणि, प्रमाणपत्राणि च वितरितानि। कार्यक्रमः धन्यवादज्ञापनेन सह समाप्तं अभवत् । एषः उत्सवः संस्कृतविभागस्य कृते समरणीयः ननु।









# सम्प्रेषिका

## वार्षिकपत्रम्

२०२४ - २०२५